दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णद्वितीया
आषाढः 17 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-249 | 1 | जुलाई 01, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 अद्य आरभ्य समग्र-ग्रामीणभारते 'वी.बी. जी-राम-जी' (VB-G RAM G) अधिनियमः २०२५ प्रवृत्तः भविष्यति

3 मुख्यमन्त्री-सुक्खुः अवदत्- नेरी-क्षेत्रे देशस्य प्रथमे जैव-अङ्गार (बायोचार) संयन्त्रे २८,८०० कार्बन-क्रेडिट् इत्यस्य अनुमानम्

4 पूर्वकुलपतेः डॉ.विश्वनाथझा-महोदयस्य निधनावसरे राजकीयसंस्कृत-महाविद्यालये ज्योतिर्वेदविज्ञानसंस्थाने च श्रद्धाञ्जलिसभायाः आयोजनम्

## जनरल-धीरज-सेठः एकत्रिंशत्तमः (३१) सेनाप्रमुखरूपेण पदभारं गृहीतवान्



**हिमसंस्कृतवार्ता।** जनरल-धीरज-सेठः एकत्रिंशत्तमः (३१) सेनाप्रमुखरूपेण पदभारं गृहीतवान् अस्ति। जनरल-उपेन्द्र-द्विवेदी चतुरधिकदशकेभ्यः (४० वर्षेभ्यः) अपि अधिकं कालं यावत् राष्ट्रसेवाम् अनुभूय सेवानिवृत्तः अभवत्। जनरल-सेठः पुणे-नगरस्थ-खड़कवासला-राष्ट्रीयरक्षाअकादमी (एन.डी.ए.) इत्यस्य भूतपूर्वः छात्रः अस्ति, सः दिसम्बर १९८६ तमे वर्षे कवचित-दले कमीशनं (अधिकारिपदं) प्राप्तवान् आसीत्। प्रायः चतुर्णां दशकानां (४० वर्षाणाम्) स्वकीयायां विशिष्टायां सैन्यसेवायां सः परिचालन-रणनीति-क्षमताविकास-संस्थागतक्षेत्रेषु व्यापकम् अनुभवं प्राप्तवान्। सः अस्य बलेन भारतीयसेनायाः युद्धक्षमतायां दीर्घकालीनपरिवर्तने च महत्त्वपूर्णं योगदानं दत्तवान् अस्ति। तस्य कमाण्ड-असाइनमेण्ट् (नेतृत्व-दायित्वेषु) मरुभूमिक्षेत्रे एका कवचित-सैन्यदलम्, पश्चिम-सीम्नि एका कवचित-वाहिनी तथा च जम्मू-काश्मीरे एकं आतङ्कवाद-विरोधि-बलं सम्मिलितानि सन्ति। लेफ्टिनेण्ट्-जनरल-रूपेण सः सुदर्शन-चक्र-कोर इत्यस्य कमानं (नेतृत्वं) सञ्चालितवान्, यत् भारतीयसेनायाः प्रमुखासु स्ट्राइक्-फॉर्मेशन (आक्रमण-रचनासु) अन्यातमं वर्तते। अनन्तरं सः देहलीक्षेत्रस्य 'जनरल ऑफिसर कमाण्डिङ्ग' (जी.ओ.सी.) रूपेण कार्यम् अकरोत्, यत्र सः प्रमुखाणां राष्ट्रीय-अन्तरराष्ट्रीय-सैन्यअभियानानां तथा च औपचारिक-उत्तरदायित्वानां निर्वहणम् अकरोत्।

## अमरनाथयात्रायाः कृते सुरक्षाव्यवस्थायां विशेषं ध्यानम्, तीर्थयात्रिणां आवासाय व्यापकाः प्रबन्धाः



**हिमसंस्कृतवार्ता।** वार्षिकी-अमरनाथयात्रायाः कृते सुरक्षाव्यवस्थायां विशेषं ध्यानं दत्त्वा पञ्चपञ्चाशत्सहस्र (५५,०००) तीर्थयात्रिणां निवासार्थं व्यापकाः प्रबन्धाः कृताः सन्ति। श्री अमरनाथ श्राइन बोर्ड इत्यस्य अध्यक्षः उपराज्यपालः मनोजसिन्हा प्रथमं दलं (जत्थे) प्रस्थापयिष्यति। त्रिसहस्र-अष्टशत-अशीति (३,८८०) मीटर् परिमितायाम् उन्नतौ स्थितायाः अमरनाथगुहायाः सप्तपञ्चाशत् (५७) दिनानां तीर्थयात्रायाः शुभारम्भः जुलाई-मासस्य तृतीये (३) दिनाङ्के भविष्यति। तीर्थयात्रायाः आरम्भः अनन्तनागमण्डलस्य पारम्परिकात् अष्टचत्वारिंशत् (४८) किलोमीटर् दीर्घात् नुनवान-पहलगाम-मार्गात् तथा च गान्दरबलमण्डलस्य लघोः तीव्रप्रवणतायुक्तात् (ढलान वाले) चतुर्दश (१४) किलोमीटर् बालताल-मार्गात् भविष्यति। जम्मू-मण्डलस्य सम्भागीय-आयुक्तः रमेशकुमारः अवदत् यत् जम्मू-सम्भागे प्रायः पञ्चपञ्चाशत्सहस्र (५५,०००) तीर्थयात्रिणां निवासप्रबन्धाः कृताः सन्ति। सः न्यवेदयत् यत् आवासव्यवस्था, भोजनं, स्वच्छता च समाहितं कृत्वा जम्मू-सम्भागं प्राप्नुवतां सर्वेषां तीर्थयात्रिणां कृते व्यापकाः प्रबन्धाः कृताः। लखनपुरतः बनिहालपर्यन्तं सर्वकार-सञ्चालित-आवाससुविधाः, अस्थायी-आश्रयगृहाणि, नागरिक-समाज-सङ्गठनानां समर्थनेन सह आवासप्रबन्धसहिताः विश्रामकेन्द्राः च स्थापिताः सन्ति। तीर्थयात्रिणां कृते स्थले एव (तस्मिन्नेव स्थाने) पञ्जीकरणसुविधायाः शुभारम्भः जम्मू-नगरस्य 'तवी रिवर फ्रण्ट्' इत्यत्र बुधवासरे भविष्यति। नगरवासिनाम् असुविधां न्यूनीकर्तुं पञ्जीकरणकेन्द्रं स्थानान्तरितं कृतम् अस्ति। साङ्केतिकमुद्राः (टोकन्) पूर्वमेव वितरिताः। श्राइन बोर्ड द्वारा निर्धारितानुसारं दैनिक-कोटा-अन्तर्गतं पञ्जीकरणं करिष्यते। जम्मू-रेल्वेस्थानकम्, भगवतीनगरम्, तवी रिवर फ्रण्ट्, उधमपुर-रेल्वेस्थानकम्, चन्दरकोटः, बनिहालः, लखनपुरः, साम्बा च इत्येतान् निर्धारितकेन्द्रान् समाहितं कृत्वा सुरक्षा-अनुवेधनाय (ट्रैकिंग्) च आवश्यकाः 'रेडियो फ्रीक्वेंसी आइडेंटिफिकेशन' (आर.एफ.आई.डी.) पत्राणि (कार्ड) निर्गमिष्यन्ते। ऑनलाइन-पञ्जीकरणं तथा ई-केवाईसी (e-KYC) परीक्षणं पूर्णं कृतवद्भिः तीर्थयात्रिभिः आधारशिविरं प्रति प्रस्थानात् पूर्वम् आर.एफ.आई.डी. पत्रं प्राप्तुं परामर्शः दत्तः। अधिकारिणः तीर्थयात्रिणः श्राइन बोर्ड इत्यस्य मार्गदर्शिकानां दृढतया पालनं कर्तुम् आवश्यकाः स्वास्थ्यप्रमाणपत्राणि च धरितुम् आग्रहमकूर्वन्। वृद्धेभ्यः तथा च हृदय-श्वास-रोगपीडितेभ्यः तीर्थयात्रिभ्यः उचित-चिकित्सीय-परीक्षणोत्तरमेव तीर्थयात्रां कर्तुं परामर्शः दत्तः।

## विकसितभारतस्य लक्ष्यं प्राप्तुम् उन्नतकृषिं समृद्धकृषकं च विना न सम्भवति : शिवराजसिंहचौहानः



**हिमसंस्कृतवार्ता।** कृषिमन्त्री शिवराजसिंहचौहानः अवदत् यत् विकसितभारतस्य लक्ष्यं प्राप्तुम् उन्नतकृषिं समृद्धकृषकं च विना न सम्भवति। हरियाणाप्रान्तस्य रेवाड़ीमण्डले कृषिविश्वविद्यालयस्य 'खेत बचाओ अभियान' (क्षेत्र रक्षत अभियानस्य) समापनसमारोहे सः अवदत् यत् कृषकाः अर्थव्यवस्थायाः मेरुदण्डः सन्ति, कृषकाणां समृद्धिः एव देशस्य समृद्धेः आधारः अस्ति। सः अकथयत् यत् केन्द्रसर्वकारः कृषिं लाभप्रदाम्, आधुनिकां, स्थायिनीं च कर्तुं निरन्तरं कार्यं करोति।

## सुभाषितम्

**स्नेहच्छेदेऽपि साधूनां, गुणा नायान्ति विक्रियाम्।**
**भङ्गेऽपि हि मृणालानाम्, लुबध्नन्ति तन्तवः॥**
**(हितोपदेश, मित्रलाभ- ९५)**

अर्थात्- स्नेह टूट जाने पर भी सज्जनों के गुण नहीं पलटते हैं, जैसे कमल की डंडी के टूटने पर भी उसके तन्तु जुड़े ही रहते हैं।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## विदेशमन्त्री एस. जयशङ्करः यूरोपीय-सङ्घ-परिषदः अध्यक्षतां स्वीकर्तुं आयरलैण्ड-देशस्य विदेशमन्त्रिणे हेलेन् मैकएण्टी-महोदयायै शुभाशयान् अयच्छत्



हिमसंस्कृतवार्ता। विदेशमन्त्री सुब्रह्मण्यम् जयशङ्करः यूरोपीय-सङ्घ-परिषदः अध्यक्षतां स्वीकर्तुं आयरलैण्ड-देशस्य विदेशमन्त्रिणे हेलेन् मैकएण्टी-महोदयायै शुभाशयान् दत्तवान्। सामाजिक-माध्यमस्य एकस्मिन् सन्देशे डॉ. जयशङ्करः अवदत् यत् तौ व्यापार-शिक्षा-सहितं विविधक्षेत्रेषु सहयोगं अधिकं सुदृढं कर्तुं विषयमपि चर्चामकुरुताम्। सः अकथयत् यत् उभौ पक्षौ बहुपक्षीयक्षेत्रे स्व सहभागिताम् अग्रे नेष्यतः।

# अद्य आरभ्य समग्र-ग्रामीणभारते 'वी.बी. जी-राम-जी' (VB-G RAM G) अधिनियमः २०२५ प्रवृत्तः भविष्यति




**हिमसंस्कृतवार्ता।** 'विकसित भारत – गारण्टी रोजगार और आजीविका मिशन (ग्रामीण)' अर्थात् 'वी.बी. जी-राम-जी' अधिनियमः २०२५ अद्यारभ्य समग्र-ग्रामीणभारते प्रवृत्तः भविष्यति। अस्य राष्ट्रव्यापि-कार्यान्वयनस्य पूर्वसन्ध्यायां केन्द्रीय-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः अवदत् यत् कोऽपि पात्रः ग्रामीणश्रमिकः एकमपि दिनं यावत् उद्यमहीनः न भवेत्। श्रीचौहानः अकथयत् यत् सर्वकारः राज्यैः केन्द्रशासितप्रदेशैः च सह दृढसमन्वयेन नूतन-तन्त्रे सुचारुरूपेण परिवर्तनं सुनिश्चितं कर्तुं सर्वाः प्रशासनिक-वित्तीय-तकनीकी-सज्जाः पूरितवान् अस्ति।सः अवदत् यत् पर्याप्त-वित्तीय-संसाधनानि उपलब्धानि कृतानि सन्ति, कार्यान्वयन-प्रणाल्यः पूर्णरूपेण सज्जाः सन्ति, प्रचलन्तः कार्याः च विना किमपि अवरोधं निरन्तरं चलिष्यन्ति। श्रीचौहानः अकथयत् यत् पञ्चविंशत्यधिक-एकशत (१२५) दिनानां वैतनिक-रोजगारस्य वर्धिता आश्वासनम् ग्रामीण-आजीविकां सुदृढां करिष्यति, स्थायि-सामुदायिक-सम्पत्तीनां निर्माणं करिष्यति तथा च विकसितभारतस्य लक्ष्यं गतिं प्रदास्यति। ग्रामीणविकासमन्त्रालयेन उक्तं यत् एषः अधिनियमः ग्रामीणरोजगारस्य, आजीविकासुरक्षायाः, सतत-ग्रामविकासस्य च कृते एकं सुदृढं तन्त्रं (ढाञ्चं) सज्जीकरिष्यति। एषः अधिनियमः प्रत्येकस्य पात्र-ग्रामीणपरिवारस्य कृते वैधानिक-वैतनिक-रोजगार-गारण्टीं शत (१००) दिनेभ्यः वर्धयित्वा पञ्चविंशत्यधिक-एकशत (१२५) दिनानि करोति, तथा च 'विकसित भारत-२०४७' इत्यस्य लक्ष्यं गतिं दत्त्वा स्थायि-ग्रामीण-सम्पत्तीनां निर्माणं कर्तुम् इच्छति।

# गृहमन्त्री अमितशाहः 'विदेशी अंशदान अधिनियम २.०' इति पोर्टल-सञ्चालनस्य शुभारम्भम् अकरोत्




**हिमसंस्कृतवार्ता नवदेहली।**
गृहमन्त्री अमितशाहः नवदिल्ल्यां विदेशी अंशदान (विनियमन) अधिनियम-एफ.सी.आर.ए २.० पोर्टल इत्यस्य तथा च इलेक्ट्रॉनिक प्रवासी भारतीय नागरिक (ई-ओसीआई) कार्ड इत्यस्य शुभारम्भम् अकरोत्। अस्मिन् अवसरे सः अवदत् यत् एताभ्याम् उभाभ्याम् उपक्रमाभ्यां नागरिकसेवासु परिष्कारः भविष्यति, एफ.सी.आर.ए पोर्टल-माध्यमेन दानं प्राप्नुवद्भिः अनुभूयमानानां काठिन्यानां समाधानं च भविष्यति। सः अकथयत् यत् यदा उद्देश्यं स्पष्टं भवति, नीतिः पारदर्शिनी भवति, प्रौद्योगिकीं च स्वीकर्तुं मानसिकता भवति, तदा प्रामाणिकानां जनानां कृते शासनस्य सर्वाणि रूपाणि सरलानि भवन्ति। सः अपि च अवदत् यत् यदा दुष्कर्मकर्तृणाम् विरुद्धं कठोरा निरीक्षणप्रणाली (सतर्कतातन्त्रं) संस्थाप्यते, तदा देशस्य सुरक्षा निरन्तरं वर्धते। गृहमन्त्री अकथयत् यत् ओ.सी.आई प्रणाल्याम् आरम्भिक्यः समस्याः नूतनप्रणाल्यां दूरीकृताः सन्ति, एतेन पञ्चाशत् (५०) लक्षात् अधिकेभ्यः ओ.सी.आई कार्डधारकेभ्यः महती सुविधा भविष्यति। सः अवदत् यत् विंशति (२०) वर्षाणाम् अनन्तरं यदा नूतनं पारपत्रं (पासपोर्ट) निर्गमिष्यति, तदा ओ.सी.आई पुस्तिकाय पुनः निर्गमनस्य आवश्यकता न भविष्यति, कार्डधारकस्य पञ्जीकरणसङ्ख्या च अद्वितीया (अपरिवर्तिता) स्थास्यति। विदेशी अंशदान (विनियमन) अधिनियमस्य अन्तर्गतं अनुपालनं सरलीकर्तुं तथा च निरीक्षण-प्रवर्तन-तन्त्रं सुदृढं कर्तुं एफ.सी.आर.ए. २.० पोर्टल इति विकसितं कृतम् अस्ति। आवेदन-नवीनीकरण-वार्षिकविवरणी (वार्षिक रिटर्न)-अन्याभिः सेवाभिः च सम्बद्धाः सर्वाः प्रमुखाः प्रक्रियाः इदानीम् एकस्याः सम्पूर्ण-ऑनलाइन-प्रणाल्याः माध्यमेन पूर्णरूपेण डिजिटलीकृताः सन्ति। ई-ओसीआई कार्ड एका प्रमुखा नागरिककेन्द्रिता योजना अस्ति, यस्याः उद्देश्यं वैश्विक-भारतीय-प्रवासी-समुदायस्य कृते ओसीआई-सेवाः पूर्णरूपेण डिजिटल-मञ्चस्य (प्लेटफॉर्मस्य) माध्यमेन रूपान्तरितं करणीयम् अस्ति। नूतनप्रणाल्याः अन्तर्गतं, आवेदकाः आवेदनपत्रं प्रदातुं सहायकप्रमाणपत्राणि अपलोड् कर्तुं च आरभ्य, अनुमोदनात् परं डिजिटल-रूपेण निर्मितं कार्ड डाउनलोड् करणपर्यन्तं सम्पूर्णां ओसीआई-प्रक्रियां ऑनलाइन-माध्यमेन पूरयितुं शक्नुवन्ति।

# जापान-देशस्य प्रधानमन्त्री सनाए-ताकाइची षोडशे (१६) भारत-जापान-वार्षिक-

## शिखरसम्मेलने भागं ग्रहीतुम् अद्य देहलीम् आगमिष्यति



**हिमसंस्कृतवार्ता।** जापान-देशस्य प्रधानमन्त्री सनाए-ताकाइची षोडशे (१६) भारत-जापान-वार्षिक-शिखरसम्मेलने भागं ग्रहीतुं अद्य सायङ्काले त्रिदिवसीयायै यात्रायै नवदेहलीं प्राप्स्यति। विदेशमन्त्रालयेन उक्तं यत् इदं शिखरसम्मेलनम् उभाभ्यां पक्षाभ्यां द्विपक्षीयसहयोगस्य सर्वेषां पक्षाणां समीक्षां सुदृढीकरणं च कर्तुं तथा च परस्परहितस्य क्षेत्रीय-वैश्विक-विषयेषु विचाराणाम् आदानप्रदानं कर्तुं अवसरं प्रदास्यति। यात्रायाः द्वितीये दिने, प्रधानमन्त्रिणः ताकाइची-महोदायायाः राष्ट्रपतिभवने औपचारिकं स्वागतं करिष्यते। ततः परं सा प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मेलिष्यति। उभौ नेतारौ द्विपक्षीयसम्बन्धेषु प्रगतेः समीक्षां कर्तुं तथा च प्रमुखक्षेत्रेषु सहयोगं अधिकं दृढं कर्तुं उपायेषु चर्चां करिष्यतः इति आशा अस्ति। अस्मात् परं सहमतिपत्राणाम् (MoUs) आदानप्रदानं करिष्यते, संयुक्ता प्रेसवार्ता (प्रेस विज्ञप्तिः) च प्रसारयिष्यते। अपराह्णे, प्रधानमन्त्री ताकाइची राष्ट्रियराजधान्याम् आयोजिते भारत-जापान-व्यापार-मञ्चे भागं ग्रहीष्यति।प्रधानमन्त्रिणः ताकाइची-महोदयायाः इयं भारतस्य प्रथमा आधिकारिकी यात्रा अस्ति। इयं यात्रा गतवर्षस्य अगस्तमासे पञ्चदशाय (१५) भारत-जापान-वार्षिक-शिखरसम्मेलनाय प्रधानमन्त्रिणः नरेन्द्रमोदिनः टोक्यो-यात्रायाः अनन्तरं भवन्ती अस्ति। इयं यात्रा भारत-जापान-देशयोः विशेष-रणनीतिक-वैश्विक-सहभागितां (साझेदारी) अधिकं सुदृढं कर्तुं द्वयोः देशयोः उभयपक्षीयं प्रतिबद्धतां दर्शयति।

# पर्यटनमन्त्रालयेन गूगल् इण्डिया संस्थया सह एकस्मिन् सहमतिपत्रे (MoU) हस्ताक्षरं कृतम्



हिमसंस्कृतवार्ता। पर्यटनमन्त्रालयेन भारतस्य पर्यटनस्थलानां डिजिटल-प्रचारं सुदृढं कर्तुं गूगल् इण्डिया संस्थया सह एकस्मिन् सहमतिपत्रे हस्ताक्षरं कृतम्। इदं सहमतिपत्रं नवदिल्ल्यां पर्यटनमन्त्रिणः गजेन्द्रसिंहशेखवा तस्य उपस्थितौ सम्पन्नम् अभवत्। अस्मिन् अवसरे श्रीशेखवातः अवदत् यत् डिजिटल-प्रौद्योगिक्यः तादृशान् अनुभवान् प्रदातुं शक्नुवन्ति, ये विश्वस्तरीयाणां दर्शकानां कृते भारतस्य सांस्कृतिकस्थलानां महिमानं भव्यतां च प्रदर्शयन्ति। सः अकथयत् यत् 'इन्क्रेडिबल् इण्डिया' (अतुल्यभारतम्) इति उपक्रमस्य अन्तर्गतं एषः सहयोगः भारतस्य वैश्विक-पर्यटन-उपस्थितिं सुदृढां करिष्यति, डिजिटल-पहुंचस्य (डिजिटल-पहुंच इति व्यवस्थायाः) परिष्कारं करिष्यति, देशं च एकं आधुनिकं वैश्विकस्तरे प्रतिस्पर्धि-पर्यटनस्थलं रूपेण संस्थापयिष्यति।

# मुख्यमन्त्री-सुक्खूः अवदत्- नेरी-क्षेत्रे देशस्य प्रथमे जैव-अङ्गार (बायोचार) संयन्त्रे २८,८०० कार्बन-क्रेडिट् इत्यस्य अनुमानम्



**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशस्य हमीरपुरमण्डलस्य 'नेरी' स्थाने देशस्य प्रथमं स्वदेशीयं जैव-अङ्गार (बायोचार) संयन्त्रं स्थाप्यमानं वर्तते। मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खूना अस्याः परियोजनायाः प्रगतेः समीक्षा कृता। एतत् संयन्त्रं राज्यस्य दशसु वर्षेषु प्रायः २८,८०० 'कार्बन-क्रेडिट्' अर्जयितुं साहाय्यं विधास्यति। मुख्यमन्त्रिणा प्रतिपादितं यत् एषा परियोजना जीविकायाः अवसरान् वर्धयिष्यति। एषा वनसंसाधनानां सततप्रबन्धनं प्रोत्साहयिष्यति। अनेन पर्यावरणसंरक्षणेन साकमेव राज्यस्य आर्थिकविकासस्यापि गतिः वर्धिष्यते।

परियोजनायै जैवभाराणाम् (बायोमास) क्रयणं २.५० रूप्यकाणि प्रतिकिलोग्रामं दरेण क्रियमाणं वर्तते। गुणवत्तां स्थापयितुं प्रदर्शन-आधारितं प्रोत्साहनम् अपि प्रदीयते। जैव-अङ्गारस्य उत्पादनं सरलवृक्षस्य (चीड़ की) पर्णैः, लैंटाना, वंशैः (बांस) अन्यैः पादप-आधारित-जैवभारैश्च भविष्यति। गते वर्षे अगस्तमासे नेरी-जाहू क्षेत्रयोः द्वयोः जैव-अङ्गारसंयन्त्रयोः स्थापनाय सहमतिः (समझौता) संजाता आसीत्। एषा सहमतिः 'डॉ. वाई.एस. परमार बागवानी एवं वानिकी विश्वविद्यालय नौणी' तथा वनविभागस्य मध्ये अभवत्। अस्मिन् 'प्रोक्लाइम सर्विसेज प्राइवेट लिमिटेड चेन्नई' अपि सम्मिलिता आसीत्।

## 'हिम एवरग्रीन' कार्यक्रमस्य विस्तारः

सुक्खूना 'हिम एवरग्रीन इंटीग्रेटेड क्लाइमेट-स्मार्ट एग्रीकल्चर एंड एग्रो-फॉरेस्ट्री' कार्यक्रमस्य अपि उल्लेखः कृतः। अस्य अन्तर्गतं कृषिव्यवस्थासु वृक्षाः सम्भृताः करिष्यन्ते। एषः कार्यक्रमः जलवायुपरिवर्तनस्य प्रयासान् वर्धयिष्यति कृषकेभ्यः च आर्थिक-अवसरान् स्रक्ष्यति। एषः हिमाचलप्रदेशस्य ५०,००० हेक्टेयर परिमिते कृषिक्षेत्रे प्रवर्तिष्यते। अनेन १.३५ कोटिटन परिमितस्य कार्बन-डाइऑक्साइड् उत्सर्जनस्य प्रबन्धने योगदानं प्राप्स्यति।

एषः कार्यक्रमः मृत्तिकायाः (मिट्टी) स्वास्थ्ये विकासं, जैवविविधतायाः संरक्षणं कृषेः जलवायु-अनुकूलतावर्धनं च विधास्यति। कार्बन-अवशोषणस्य माध्यमेन मापनीयाः जलवायुपरिणामाः प्राप्स्यन्ते। प्रोक्लाइम-संस्थायाः परामर्शदलमण्डलस्य सदस्येन एरिक-सोलहाइम महोदयेन हिमाचलसर्वकारस्य प्रयासाः श्लाघिताः। तेन कथितं यत् संस्था जलवायुसङ्कटस्य सम्मुखीकरणाय वैज्ञानिकदृष्टिकोणस्य प्रभावी-क्रियान्वयनस्य च समन्वयाय कटिबद्धा वर्तते।

# कौतुकेन प्राप्ताः ३२ उपाधयः, अधुना 'आचार्य' इति उपाधिं प्राप्तुं प्रविष्टः ७५ वर्षीयः मिल्खीरामः



**हिमसंस्कृतवार्ताः — हमीरपुरम्।** कथ्यते यत् अध्ययनस्य कापि आयुः न भवति। एतामेव उक्तिं चरितार्थीकृत्य दर्शयन् अस्ति काङ्गड़ामण्डलस्य गन्दड़-ग्रामस्य ७५ वर्षीयः डॉ. मिल्खीरामः। सः केवलं कौतुकेन एव ३२ उपाधीन् (डिग्रियां) प्राप्तवान् अस्ति, अधुना च 'आचार्य' इति उपाधिं प्राप्तुम् 'इग्नू' (IGNOU) केन्द्रं हमीरपुरं सम्प्राप्तः। १० फरवरी १९५२ तमे दिनाङ्के काङ्गड़ामण्डलस्य गन्दड़-ग्रामे जातः मिल्खीरामः धर्मशालायाः कस्याश्चित् वैयक्तिक-महाविद्यालयतः (प्राइवेट कॉलेज) १९७६ तमवर्षे (२४ वर्षे) स्नातक-उपाधिं (ग्रेजुएशन) प्राप्तवान् आसीत्। मिल्खीरामः १९७२ तमवर्षे वनविभागे नियुक्तः अभवत् तथा च २०१० तमवर्षे 'ग्रेड-वन' इति पदात् सेवानिवृत्तः जातः। डॉ. मिल्खीरामेण सेवाकाले (जॉब के दौरान) अपि अध्ययनं निरन्तरं कृतं, सेवानिवृत्तिं यावत् च तेन २६ उपाधयः प्राप्ताः आसन्, येषां सङ्ख्या अधुना ३२ यावत् संजाता अस्ति। डॉ. मिल्खीरामेण बी.ए. प्रभाकरः, बी.एड्., एल.एल.बी., जे.एम.सी., संस्कृतम्, एम.ए. हिन्दी, एम.ए. राजनीतिविज्ञानम्, समाजशास्त्रम्, इतिहासः, आङ्ग्लभाषा, अर्थशास्त्रम्, एम.बी.ए., एम.फिल्. तथा हिन्द्यां पी.एच.डी. (PhD) इत्येताः अन्याः च उपाधयः प्राप्ताः सन्ति। तस्य धर्मपत्नी विद्यादेवी अपि वनविभागादेव 'ग्रेड-वन' पदात् एव सेवानिवृत्ता अस्ति। यत्रैव तस्य पुत्रः राकेशकुमारः भारतीयधूमशकटविभागे (इंडियन रेलवे) 'आई.आर.टी.एस.' (IRTS) अधिकारी वर्तते। डॉ. मिल्खीरामेण कथितं यत् सः डॉ. बाबा भीमराव अम्बेडकर महोदयेन भृशं प्रेरितः अस्ति। एतदतिरिच्य तस्य धर्मपत्न्याः विद्यादेव्याः अपि तस्मै पूर्णं समर्थनं प्राप्तम्, तदैव सः स्वकीयं पठनम् अधुना यावत् निरन्तरं कर्तुं शक्नोत्। तेन उक्तं यत् पुत्राणाम् स्नुषायाः (बहू) च अपि तस्मै पूर्णं सहयोगं मिलति। पठनकाले कापि बाधा न भवेत्, एतदर्थं सद्यः एव नेत्राणाम् उपचारः अपि कारितः।

इग्नू-केन्द्र-हमीरपुरस्य प्रभारी डॉ. सञ्जयकुमारः अवदत् यत् इग्नू-केन्द्रे हमीरपुरे मङ्गलवासरे सर्वस्मात् वृद्धः डॉ. मिल्खीरामः परीक्षां दातुं सम्प्राप्तः, यः कश्चन प्रेरणास्रोतः अस्ति। डॉ. मिल्खीरामस्य इग्नू-केन्द्रे हमीरपुरे आगमने पुष्पगुच्छं प्रदाय स्वागतं विहितम्। यतः ७५ वर्षस्य वयसि यत्र जनानां पठने काठिन्यं भवति, तत्रैव मिल्खीरामः परीक्षां दातुं दृढतया स्थितः अस्ति।

# सेवारतानां शिक्षकाणां सी.बी.एस.ई. (CBSE) विद्यालयेषु नियुक्तौ बुधवासरे भविष्यति निर्णयः, सचिवालये प्रचलिष्यति उपवेशनम्




**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशस्य सर्वकारीयेषु १५८ सी.बी.एस.ई.-विद्यालयेषु सेवारतानां शिक्षकाणां नियुक्तिः योग्यताक्रम-आधारेण भविष्यति न वा, अस्मिन् विषये बुधवासरे निर्णयः भविष्यति। उपमुख्यमन्त्रिणः मुकेश-अग्निहोत्रिणः अध्यक्षतायां द्विवादने सचिवालये मन्त्रिमण्डल-उपसमित्याः (कैबिनेट सब-कमेटी) उपवेशनं प्रचलति। राजस्वमन्त्री जगत्सिंहनेगी, शिक्षामन्त्री रोहितठाकुरः, टी.सी.पी.-मन्त्री राजेशधर्माणी च अस्मिन् उपवेशने भागं ग्रहीष्यन्ति। योग्यताक्रमस्य आधारेण विद्यालयेषु सेवारताः शिक्षकाः नियुक्तयः याचन्ते। १५८ सी.बी.एस.ई.-विद्यालयेषु सेवारतानां शिक्षकाणां नियुक्तये शिक्षाबोर्ड-माध्यमेन परीक्षा आयोजिता आसीत्। सी.बी.एस.ई.-विद्यालयेषु शिक्षकाणां संस्थापनां प्रति शिक्षकाः सुदीर्घकालात् प्रतीक्षां कुर्वन्तः सन्ति। शिक्षाविभागेन एतेषु विद्यालयेषु योग्यानां तथा च इच्छुकानां शिक्षकाणां नियुक्तये लिखिता परीक्षा आयोजिता आसीत्। परीक्षायाः परिणामाः अपि घोषिताः सन्ति, योग्यतासूची च सज्जा वर्तते। प्रस्तावितयोजनायाः अन्तर्गतं योग्यताक्रमस्य आधारेण शिक्षकेभ्यः तेषाम् इच्छानुसारं प्राप्त्यनुसारं च सी.बी.एस.ई.-विद्यालयाः आबंटनीयाः आसन्। यद्यपि नियुक्तिप्रक्रियायाः आरम्भात् पूर्वमेव सर्वकारेण विषयस्य समीक्षां विधातुं मन्त्रिमण्डल-उपसमित्याः सङ्गटनम् कृतम्। समित्या नियुक्त्याः विधीनां, सम्भाव्य-प्रशासनिक-प्रभावाणां तथा च शिक्षकाणां संस्थापनेन सम्बद्धानां विभिन्नानां पक्षाणाम् उपरि विचारः करणीयः अस्ति। एतस्मादेव कारणात् अन्तिमः निर्णयः समित्याः संस्तुतीनां (सिफारिशों के) परमेव ग्रहीष्यते।

## महत्त्वपूर्ण-सेतुपरियोजनानां रूपाङ्कनस्य परीक्षणाय एन.एच.ए.आई. देशे एकं संस्थागतं तन्त्रं निर्मास्यति

हिमसंस्कृतवार्ता। राष्ट्रीय-अवसंरचनायाः सुदृढतां सुरक्षां च वर्धयितुम्, रूपाङ्कनस्य (डिज़ाइन इत्यस्य) विश्वसनीयतायां परिष्कारं कर्तुं तथा च दीर्घकालीन-परिचालनगत-सङ्कटान् न्यूनीकर्तुं, भारतीय राष्ट्रीय राजमार्ग प्राधिकरणं (एन.एच.ए.आई.) महत्त्वपूर्ण-सेतुपरियोजनानां रूपाङ्कनस्य परीक्षणाय देशे एकं संस्थागतं तन्त्रं निर्मातुं गच्छति। सड़क-परिवहन-राजमार्ग-मन्त्रालयस्य अनुसारम् अस्य उपक्रमस्य उद्देश्यम् इदं सुनिश्चितं करणीयम् अस्ति यत् शतं (१००) वर्षाणि वा तस्मात् अधिकं कालं यावत् स्थातुं रूपाङ्कितानां (डिज़ाइन कृतानां) बृहत-सेतूनां निर्माण-प्रारम्भात् पूर्वं तेषां कठोरा स्वतन्त्रा च तकनीकी-समीक्षा भवेत्। एतदर्थम्, एन.एच.ए.आई. सर्वासु नवीनासु राष्ट्रीय-राजमार्ग-परियोजनासु बृहत-सेतूनां जलीय-अध्ययनस्य (हाइड्रोलिक-अध्ययनस्य) रूपाङ्कनानां च स्वतन्त्र-परीक्षणं कर्तुं भारतीय-प्रौद्योगिकी-संस्थानानि (आई.आई.टी.) अन्यान् च प्रमुखान् तकनीकी-संस्थानान् योजयिष्यति

# पूर्वकुलपतेः डॉ.विश्वनाथझा-महोदयस्य निधनावसरे राजकीयसंस्कृतमहाविद्यालये ज्योतिर्वेदविज्ञानसंस्थाने च श्रद्धाञ्जलिसभायाः आयोजनम्



हिमसंस्कृतवार्ता, राघव नाथ झा। कामेश्वरसिंह-दरभङ्गासंस्कृतविश्वविद्यालयस्य भूतपूर्वकुलपतिः, पटना-स्थितराजकीयसंस्कृतमहाविद्यालयस्य भूतपूर्वप्रधानाचार्यः, संस्कृतवाङ्मयस्य प्रकाण्डविद्वान् च आदरणीयः डॉ. विश्वनाथझा-महोदयः अकस्मात् नश्वरदेहं त्यक्त्वा दिवङ्गतः। तस्य निधनसमाचारेण शोकसन्तप्तैः विद्वद्भिः राजकीयसंस्कृतमहाविद्यालये (पटना) तथा ज्योतिर्वेदविज्ञानसंस्थाने च श्रद्धाञ्जलिसभे आयोजिते, यत्र दिवङ्गतात्मने भावपूर्णा श्रद्धाञ्जलिः अर्पिता। ज्योतिर्वेदविज्ञानसंस्थाने आयोजितायां शोकसभायां संस्थानस्य निदेशकः डॉ. राजनाथझा-महोदयः गहनं शोकं प्रकटयन् उक्तवान् यत्—"डॉ. विश्वनाथझा-महोदयस्य व्यक्तित्वं संस्कृतसाधनायाः, प्रगाढविद्वत्तायाः, उत्कृष्टानुशासनस्य, भारतीयज्ञानपरम्परां प्रति च अनन्यसमर्पणस्य अनुपममुदाहरणम् आसीत्। तेन कृतं योगदानं संस्कृतजगतः कृते सर्वदा प्रेरणास्रोतोरूपेण स्मरणीयं भविष्यति।"अस्यां सभायां हृदयनारायणझा-महोदयः, शशिभूषणझा-महोदयः, चन्द्रभूषणझा-महोदयः, ललनशङ्करझा-महोदयः, केशवकुमारः, आलोककुमारः, राघवनाथझा-महोदयः अन्ये च उपस्थिताः सदस्याः दिवङ्गतात्मनः प्रति श्रद्धासुमनांसि अर्पयन्तः शोकसंवेदनां प्रकटितवन्तः। तथैव, दिनाङ्के ३० जून २०२६ तमे वर्षे अपराह्णे तृतीयवादने राजकीयसंस्कृतमहाविद्यालये (पटना) शोकसभा समाहूता। अस्यां सभायां प्रधानाचार्यः डॉ. मनोजकुमारः, प्रो. उमेशशर्मा, डॉ. ज्योत्स्ना, डॉ. शिवानन्दशुक्लः, डॉ. विवेकानन्दपासवानः, डॉ. शशिकान्ततिवारी, डॉ. शबानाशिरीन्, ऋषिकुमारमिश्रः, शत्रुघ्नरायः, दीपककुमारः इत्यादयः समस्ताः शिक्षकाः, शिक्षकेत्तरकर्मचारिणः, छात्राश्च उपस्थिताः भूत्वा डॉ. विश्वनाथझा-महोदयस्य महाविद्यालयं, संस्कृतशिक्षाम्, समाजं च प्रति अमूल्ययोगदानं संस्मृत्य भावपूरितां श्रद्धाञ्जलिम् अर्पितवन्तः। श्रद्धाञ्जलिसभयोः समापनकाले दिवङ्गतपुण्यात्मनः चिरशान्त्यर्थं तथा शोकसन्तप्तपरिवारजनानां कृते धैर्यबलप्राप्त्यर्थं च द्विनिमेषं यावत् मौनधारणपूर्वकं सामूहिकी प्रार्थना कृता।

## "लौकिकन्यायकोशः"

## "कतकरेणुन्यायः"

'कतक' इत्यस्य फलस्य किञ्चिद् वैशिष्ट्यम् अस्ति तत् फलं कलुषिते जले स्थापितं चेत् तस्य जलस्य कालुष्यं नष्टं भवति जलं शुद्धं भवति। जलं शुद्धं कर्तुं सामर्थ्य तस्मिन् फले विद्यते। तथा कश्चन स्वस्य संसर्गेन किं वा संपर्केण अन्येषां दुर्गुणान् दूरीकर्तुं शक्नोति इति अनेन न्यायेन बोध्यते।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**

# रजनीशर्मा-मृत्युप्रकरणम्: स्त्रीरोगविशेषज्ञा चिकित्सिका निलम्बिता, उपेक्षाकरणे सर्वकारेण गृहीतं कठोरं संज्ञानम्

हिमसंस्कृतवार्ताः — कुल्लू :।क्षेत्रीयचिकित्सालये कुल्लू इत्यस्मिन् सिजेरियन्-प्रसवानन्तरं संजातायाः रजनीशर्मा इत्यस्याः मृत्युप्रकरणे सर्वकारेण स्वास्थ्यविभागेन च कठोरं संज्ञानं गृहीतम्। सर्वकारेण स्वास्थ्यविभागेन च स्त्रीरोगविशेषज्ञा चिकित्सिका निलम्बिता। सर्वकारेण स्वास्थ्यविभाग-कुल्लू-मण्डलाय चिकित्सिकायाः निलम्बनस्य आदेशः मङ्गलवासरे सायङ्काले प्रेषितः। अपरपक्षे, कुल्लू-सदर-क्षेत्रस्य विधायकः मङ्गलवासरे द्विवारं क्षेत्रीयचिकित्सालयस्य प्राङ्गणं तत्र आमरणानशने उपविष्टान् जनान् मेलितुं सम्प्राप्तः। अस्मिन् अन्तराले तेन चिकित्सालयप्रबन्धकेन सह अस्य विषयस्य गम्भीरतया अन्वेषणं विधातुं विमर्शः कृतः। साकमेव मुख्यमन्त्रिणा सह अपि दूरभाषमाध्यमेन अस्मिन् प्रकरणे कठोरा प्रकिया प्रचालयितुं वार्ता कृता। तस्य अस्यां वार्तायां सर्वकारेण सद्यः एव प्रक्रमः विहितः, स्त्रीरोगविशेषज्ञा डॉ. अनु महोदया च निलम्बिता। निलम्बनस्य आदेशपत्रं (ऑर्डर कॉपी) नीत्वा विधायकः सुन्दरसिंहठाकुरः पुनः आमरणानशने उपविष्टानामन्तिकं गतः, तेभ्यः चिकित्सिकायाः निलम्बनस्य आदेशः दर्शितः, आदेशपत्रं च प्रदत्तम्। एतस्मात् परं जनैः विधायकस्य धन्यवादः ज्ञापितः।उल्लेखनीयं वर्तते यत् क्षेत्रीयचिकित्सालये कुल्लू इत्यस्मिन् २१ जून् २०२६ तमे दिनाङ्के शस्त्रकर्मोत्तरं (ऑपरेशन के बाद) प्रसूतायाः महिलायाः मृत्युप्रकरणे स्त्रीरोगविशेषज्ञा डॉ. अनुदेवी निलम्बिता अस्ति। स्वास्थ्यसेवा-निदेशकस्य प्रतिवेदनस्य (रिपोर्ट) आधारेण प्रधानसचिव-स्वास्थ्य-एम. सुधादेव्या एषः आदेशः प्रसारितः। स्त्रीरोगविशेषज्ञया डॉ. अनुदेव्या २१ जून् दिनाङ्के एकस्याः महिलायाः सिजेरियन् कृतम् आसीत्। सिजेरियन्-प्रसवानन्तरं महिला रजनीशर्मा दिवङ्गता। प्रधानसचिवेन सी.सी.एस. सी.सी.ए. नियम १९६५ इत्यस्य १० तमस्यानुच्छेदस्य (नियम) अन्तर्गतं प्रक्रमं कृत्वा डॉ. अनुदेवी सद्यः प्रभावेण निलम्बिता। आदेशे कथितं यत् निलम्बावधौ डॉ. अनुदेव्याः मुख्यालयः स्वास्थ्य एवं परिवार कल्याण निदेशालयः शिमला भविष्यति। सा सक्षमस्याधिकारिणः अनुमतिं विना मुख्यालयं न त्यक्ष्यति। सर्वकारेण विषयस्यास्य अन्वेषणाय (जांच) अपि आदेशाः दत्ताः। विधायकेन सुन्दरसिंहठाकुरेण अनशने उपविष्टाः जनाः कथिताः यत् २०१८ तमवर्षे अपि एकस्याः महिलायाः शिशोः च मृत्युः संजाता आसीत्। तस्मात् परं सः ५० दिनानि यावत् चिकित्सालयस्य व्यवस्थां प्रति आन्दोलने उपविष्टः आसीत्। तेन उक्तं यत् अधुना रजनीशर्मा इत्यस्याः मृत्युः अभवत्, एषा अतीव दुःखदा घटना वर्तते। दिवङ्गतायै आत्मने न्यायं दापयितुं निर्णायकः प्रयासः विहितः। मुख्यमन्त्रिणा सह वार्ता कृता। सर्वकारेण सद्यः प्रभावेण डॉ. अनु महोदया निलम्बिता। यत्रैव, द्वयोः परिचारिकयोः (नर्सिज) निलम्बननामानि अपि प्रेषितानि सन्ति। विधायकेन प्रतिपादितं यत् कुल्लू-चिकित्सालयस्य व्यवस्थां सुदृढीकर्तुं तेन जनहिते सङ्घर्षः कृतः। सः चिकित्सालयात् बहिः ५० दिनानि आन्दोलने उपविष्टवान्। तेन प्रख्यापितं यत् चिकित्सालये यः कोऽपि उपेक्षां (लापरवाही) विधास्यति, तस्य उपरि प्रक्रमः भविष्यति। कुल्लू-चिकित्सालये उपेक्षा कदापि न सहिष्यते। एतदर्थं स्वसर्वकारेण सह अपि सङ्घर्षः विधास्यते।



## विधायक-सुन्दरठाकुरेण गृहीतं नवजातशिशोः पोषणस्य उत्तरदायित्वम्

विधायकेन सुन्दरसिंहठाकुरेण क्षेत्रीयचिकित्सालये मृतकायाः रजनीशर्मा इत्यस्याः नवजातपुत्र्याः पोषणस्य पालनस्य च उत्तरदायित्वं (जिम्मेदारी) स्वीकृतम्। अनशने उपविष्टैः जनैः विधायकस्य सम्मुखं शिशोः पालनपोषणस्य याचना कृता आसीत्। अस्मिन् विधायकेन कथितं यत् कन्यायाः पालनपोषणस्य भविष्यस्य च सम्पूर्णम् उत्तरदायित्वं मम भविष्यति। उल्लेखनीयं वर्तते यत् रजनीशर्मा इत्यस्याः मृत्योः विरोधे सोमवासरे मङ्गलवासरे च कुल्लू-क्षेत्रे आक्रोशः प्रवृत्तः आसीत्, धरण-प्रदर्शनात् परम् आमरणानशनम् अपि अभवत्। आमरणानशने उपविष्टाः जनाः नवजातशिशोः भविष्यं प्रति चिन्तिताः आसन्। परन्तु विधायकेन सुन्दरसिंहठाकुरेण नवजातपुत्र्याः पालनेन सह भविष्यस्यापि पूर्णं दायित्वं गृहीतम्।

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। किं त्वया मेक्सिको- देशस्य विचित्रा वार्ता श्रुता? तत्र केनचित् अज्ञातपुरुषेण चर्मचटकरूपं धृत्वा चोराः गृहीताः, मार्गदीप-स्तम्भेषु दृढपट्टिकया बद्धाः च। तेषां ललाटे 'चोरः' इति लिखितम्।

**काव्या-** नमस्ते नन्दिनि। आम्, सा वार्ता मया श्रुता। अहो, अद्भुतं साहसम्! समाजस्य रक्षणाय तेन श्लाघनीयः यत्नः कृतः। नूतना वार्ता अपि तादृशी एव अस्ति। फ्लोरिडा-प्रान्ते एकेन छद्म- आरक्षकेण कश्चित् यानचालकः रोधितः। किन्तु सः यानचालकः वास्तविकः गुप्त-आरक्षकः एव संवृत्तः! तेन सः छद्म-आरक्षकः शीघ्रमेव बद्धः।

**नन्दिनी-** सत्यम्, तस्य छद्म-आरक्षकस्य महत् दौर्भाग्यं जातम्! अन्यं भीषयितुं गतः सः स्वयं बद्धः जातः। इतः परम्, अन्या विचित्रा वार्ता श्रूयताम्। विस्कॉन्सिनप्रान्ते दम्पतिभ्याम् षष्ठवारं विवाहप्रतिज्ञा नवीकृता। सा च प्रतिज्ञा षष्टि-पाद-परिमितस्य जलप्रपातस्य उपरि कृता! ततः परं वधूः विवाहवस्त्रेण सह एव नववारं जलप्रपाते पतिता! दम्पतिभ्याम् विश्वकीर्ति-स्थापनाय प्रयासः कृतः।

**काव्या-** अहो, अतिरोचकम्! जलक्रीडया सह विवाह-विधिः तु सर्वथा अपूर्वः। पुनर्मिलामः